| | |
|---|---|
| चोरयित्वा, | चुचोरयिषित्वा; |
| प्रचोर्य, | प्रचुचोरयिष्य ; |
| चोरम् २ } | चुचोरयिषम् २; } |
| चोरयित्वा २ } | चुचोरयिषित्वा २. } |

(547) "चुल समुच्छ्राये" (X-चुरादिः-1602. सक. सेट्. उभ.)

चोलकः-लिका, चुचोलयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक-चोरयतिवत् (546) ज्ञेयानि। सञ्चोलितम्[A]। क्विपि चोल्-चोलौ-चोलः; इति रूपाणीति, चोलना इति स्त्रियां युचि रूपमिति च विशेषः।

(548) "चुल्ल भावकरणे" (I-भ्वादिः 531. अक. सेट्. पर.)

भावकरणम्=अभिप्रायाविष्कारः।

चुल्लकः-ल्लिका, चुल्लकः-ल्लिका, चुचुल्लिषकः-षिका, चोचुल्लकः-ल्लिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचिल्लतिवत् (528) ज्ञेयानि। [B]चुल्लन्-न्ती, इति शतरि रूपम्।

(549) "चूरी दाहे" (IV-दिवादिः-1158. सक. सेट्. आत्म.)

चूरकः-रिका, चूरकः-रिका, चुचूरिषकः-षिका, चोचूरकः-रिका; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकगूर्यतिवत् (419) बोध्यानि। चूरणम्[C]।

(550) "चूर्ण प्रेरणे" (X-चुरादिः-1552. सक. सेट्. उभ.)

'पेषणे' इति चन्द्रः।

अस्य धातोः क्षोदनमप्यर्थ इति धातुकाव्यव्याख्याने (3-15)।

---

A. 'सन्दोलयन्नधिकपोलितमद्रिराजं सञ्चोलितं सुबहुमूलितशाखिवृन्दैः ॥' धा. का. 3. 21.

B. 'मूलं फलं वाऽप्यदतामचुल्लतां प्रफुल्लभक्त्युन्नतिचिल्लचेतसाम् ॥' धा. का. 1. 68.
अचुल्लताम्=अनाविष्कृताशयानामित्यर्थः।

C. 'गूर्णेऽस्मिन् बहुजन्तुघूरिणि खले जूर्णैः शशंसे नृभिः
शौरिः शूरकगर्वचूरणपरः सन्तप्यमानः सताम्।' धा. का. 2. 60.